# Shri Dharmanandana Stotram

# श्रीधर्मनन्दनस्तोत्रम्

## Document Information

Text title : Shri Dharmanandana Stotram

File name : dharmanandanastotram.itx

Category : vishhnu, svAminArAyaNa, krishna, stotra, aShTaka

Location : doc_vishhnu

Author : achintyAnandabrahmachArI

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# श्रीधर्मनन्दनस्तोत्रम्

(हरिगीत छन्द)

सितसान्द्र-सद्वसनालिनं वरमाल्यमञ्जुलमालिनं
चलितालिनं पृथुमालिनं नवपुष्पभूषणशालिनम् ।
वृषपालिनं श्रितलालिनं जपमालिका-परिचालिनं
प्रणमामि धर्मसुतं हरिं शुभकारि-सद्गुणमालिनम् ॥ १॥

मलजालभृत्-कलिकण्डनं जनमित्र-सज्जनमण्डनं
स्मरतण्डनं मदभण्डनं कृतदुष्टमानव-दण्डनम् ।
जित-चण्डनं स्मयकण्डनं कृतभूरि-दुर्मतखण्डनं
प्रणमामि धर्मसुतं हरिं शुभकारि-सद्गुणमालिनम् ॥ २॥

वृषवैरि-दर्पविदारिणं श्रितजात-संसृतिहारिणं
अवतारणं शुभकारिणं मणिहेम-भूषणधारिणम् ।
जनभन्दनं मुनिवन्दनं परिचर्चितोत्तमचन्दनं
प्रणमामि धर्मसुतं हरिं शुभकारि-सद्गुणमालिनम् ॥ ३॥

जितदोषणं श्रिततोषणं कृतधर्मवंश-विपोषणं
क्षतरोषणं श्रुतजोषणं निजभक्त-मानसपोषणम् ।
जनबोधनं मतिशोधनं प्रियनम्र-शान्त-तपोधनं
प्रणमामि धर्मसुतं हरिं शुभकारि-सद्गुणमालिनम् ॥ ४॥

हृतभक्ति-मज्जनवासनं शतकोटिभास्करभासनं
जनशासनं गरुडासनं स्वनुरक्तभक्त-सभासनम् ।
हृतशोचनं घनरोचनं कृतबद्धजीव-विमोचनं
प्रणमामि धर्मसुतं हरिं शुभकारि-सद्गुणमालिनम् ॥ ५॥

भुवनोद्भवादिविधायिनं भवहारि-सद्गुणनायिनं
अनपायिनिं सुखदायिनं हितकारि-सज्जनयायिनम् ।
जनपावनं स्वजनावनं शुभधर्मभक्ति-विभावनं

प्रणमामि धर्मसुतं हरिं शुभकारि-सद्गुणमालिनम् ॥ ६॥

निजभक्त-पद्मविकाशिनं दुरतिक्रमार्ति-विनाशिनं
स्वविलासिनं मतिदाशिनं प्रियदम्भहीन-निराशिनम् ।
क्षतखेदनं शुभवेदनं यमदूत-भीतिविभेदनं
प्रणमामि धर्मसुतं हरिं शुभकारि-सद्गुणमालिनम् ॥ ७॥

असुरांश-देशिकगञ्जनं श्रितवृन्द-मानस-मञ्जनं
निजरञ्जनं भवभञ्जनं गुणनीरराशि-निरञ्जनम् ।
मुनिमाननं प्रियकाननं नवपद्मचन्द्र-वराननं
प्रणमामि धर्मसुतं हरिं शुभकारि-सद्गुणमालिनम् ॥ ८॥

नृपदेवमुक्त-सभाजितं श्रुतिशास्त्रवेदि-सभाजितं
सकलाजितं सुजनाजितं गुणभाजिवाजि-निराजितम् ।
श्रितनोदनं मुनिमोदनं दलितक्षमा-खिलतोदनं
प्रणमामि धर्मसुतं हरिं शुभकारि-सद्गुणमालिनम् ॥ ९॥

श्री अचिन्त्यानन्दब्रह्मचारीविरचितं श्रीधर्मनन्दनस्तोत्रं सम्पूर्णम् ।

*Shri Dharmanandana Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*